चप्यम्-चय्यम्, चिचपयिष्यम्-चिचययिष्यम्, चेयम्;
ईषच्चयः-दुश्चयः-सुचयः, ईषच्चपः-दुश्चपः-सुचपः;
चप्यमानः-चय्यमानः, चिचपयिष्यमाणः-चिचययिष्यमाणः चीयमानः;
चपः-चयः, चिचपयिषः-चिचययिषः, चयः;
चपयितुम्-चययितुम्, चिचपयिषितुम्-चिचययिषितुम्, चेतुम्;
चपना-चयना, चिचपयिषा-चिचययिषा, चितिः;
चपनम्-चयनम्, चिचपयिषणम्-चिचययिषणम्, चयनम्;
चपयित्वा-चययित्वा, चिचपयिषित्वा-चिचययिषित्वा, चित्वा;
[1]संचपय्य-संचयय्य, प्रचिचपयिष्य-प्रचिचययिष्य, प्रचित्य;
[2]चापम् २-चपम् २, चपयित्वा २, चायम् २-चयम् २- चययित्वा २, } चिचपयिषम् २-चिचययिषम् २, चिचपयिषित्वा २-चिचययिषित्वा२, } चायम् २; चित्वा २.

## (521) "चिट परप्रैष्ये" (I-भ्वादिः-315. सक. सेट्. पर.)

परप्रैष्यम्=दासभावः।

चेटकः-टिका, चेटकः-टिका, चिचिटिषकः-चिचेटिषकः-षिका, चेचिटकः-टिका;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककिट (190) धातुवत् बोद्धयानि।
पचाद्यचि (3-1-134) चेटः-[3]चेटी-[A]चेटिः।

## (522) "चित सञ्चेतने" (X-चुरादिः-1674. सक. सेट्. आत्म.)

'— — चिन्तयेत्। आकुस्मीयः।
स्मृत्यां, चेतति संज्ञाने, तत्र चेतयते णिचि ॥' (श्लो. 94)
इति देवः। सञ्चेतनम्=संज्ञानम्।

चेतकः-तिका, चिचेतयिषकः-षिका; चेतयिता-त्री, चिचेतयिषिता-त्री;

---

1. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः।
2. 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (6-4-93) इति णमुल्परे णौ दीर्घविकल्पः।
3. 'इन्' [दः उ.1.46] इत्यौणादिके इन्प्रत्यये, 'सर्वतोऽक्तिन्नर्थादित्येके', (वा. 4-1-45) इति ङीषि चेटी, चेटिः इति रूपद्वयं भवति।

A. 'लोको हरेर्बलमचेतयमान एतद्युद्धं मृगेन्द्रशशदंशनवत् प्रदंसन्।' धा. का. 3-33.